केन्द्रीयसंस्कृतविश्वविद्यालयः , दिल्ली

**Central Sanskrit University, Delhi**

# क्षेत्रीय-क्रीडा-सांस्कृतिक-शैक्षिक-स्पर्धानियमावली-2024

## (चतुर्दशतमः युवमहोत्सवः)

56-57 इन्स्टीट्यूश्नल एरिया,
जनकपुरी, नई दिल्ली – 110058

**56-57, Institutional Area**
**Janakpuri, New Delhi-110058**

Scanned with OKEN Scanner

# केन्द्रीयसंस्कृतविश्वविद्यालयः,दिल्ली

## क्षेत्रीय-क्रीडा-सांस्कृतिक-शैक्षिक-स्पर्धा-2024

## नियमावली

**उपक्रमः**

संस्कृतभाषायां निहितायाः भारतीयज्ञानपरम्परायाः प्रचाराय प्रसाराय च केन्द्रीयसंस्कृतविश्वविद्यालयस्य स्थापना कृता । वैश्विकस्तरे भारतस्य गरिमख्यापनक्षमस्य विश्वस्तरीयविश्वविद्यालयस्य स्वरूपेण केन्द्रीयसंस्कृतविश्वविद्यालयस्य परिवर्धनं, संस्कृतविद्यायाः समग्रशाखानां सर्वतोमुखविकासः च विश्वविद्यालयस्य लक्ष्यं विद्यते। विश्वविद्यालयस्य द्वादशपरिसराः, द्वाविंशतिः आदर्शमहाविद्यालयाः, चतस्रः शोधसंस्थाः, पञ्चाशदधिकाः संबद्धाः विद्यालयाः महाविद्यालयाश्च देशस्य विभिन्नेषु राज्येषु विलसन्ति।

**युवमहोत्सवस्य लक्ष्यम्**

विश्वविद्यालये अध्ययनरतानां छात्राणां कृते शैक्षिकविकासेन सह चित्रकलासु क्रीडासु नृत्यादिषु च स्वप्रतिभाप्रदर्शनाय प्रतिवर्षं स्पर्धात्मकः इयं **क्षेत्रीय-क्रीडा-सांस्कृतिक-शैक्षिक-स्पर्धा** (युवमहोत्सवाख्या) विश्वविद्यालयेन देशस्य विभिन्नेषु स्थानेषु समायोज्यते। अद्यावधि विश्वविद्यालयेन त्रयोदशयुवमहोत्सवाः समायोजिताः। छात्राणां कृते स्वपाटव- प्रदर्शनाय प्रेरणा अवसरप्रदानं च तथा देशस्य विभिन्नकलानां भारतीयक्रीडानां च परिचयः, संस्कृतमयवातावरणनिर्माणम् अस्य लक्ष्यं विद्यते। अस्माद्वर्षादस्य महोत्सवस्य नामपरिवर्तनं जातम्।

**संभाव्यः परिणामः**

1. क्रीडाकलादिक्षेत्रेषु संस्कृतच्छात्राणां प्रतिनिधित्वाय कौशलसंपादनम्।
2. भारतीयविश्वविद्यालयसंघेन (AIU) समायोज्यमानासु स्पर्धासु भागग्रहणाय अवसरः।
3. भारतीयक्रीडानां कलानां च परिचयः।

**भागग्रहणाय अर्हता**

- केन्द्रीयसंस्कृतविश्वविद्यालयस्य कस्मिंश्चिदपि परिसरे आदर्शमहाविद्यालये वा नियतरूपेण अधीयानाः छात्राः (चयननिमित्तकप्रक्रियया चिताः) अस्यां स्पर्धायां भागग्रहणाय अर्हाः।
- स्पर्धायोजनवर्षे परिसरेषु/आदर्शमहाविद्यालयेषु नियतकक्षासु 65% शैक्षिकोपस्थितिः येषां वर्तते त एव छात्राः स्पर्धासु भागग्रहणार्हाः।

**स्पर्धालूनां वयोमितिः-**

| स्पर्धायोजनवर्षे स्पर्धालूनां वयोमितिः इत्थं स्यात् - | |
|---|---|
| प्राक्शास्त्रिच्छात्राणां, शास्त्रिच्छात्राणां, शिक्षाशास्त्रिच्छात्राणां, आचार्यच्छात्राणां, शिक्षाचार्यच्छात्राणां, विद्यावारिधिच्छात्राणां च | 17 तः 28 वर्षपर्यन्तम्<br>(AIU) नियमानुसारम् |

Scanned with OKEN Scanner

## चयनप्रक्रिया

परिसरस्तरे/आदर्शमहाविद्यालयस्तरे क्रीडासु कलासु च प्रतिभां परीक्ष्य अर्हतावतां छात्राणां चयनं भवति। तत्र चिताः छात्राः स्पर्धासु भागग्रहणाय अर्हाः भवन्ति।

## आयोजनस्वरूपम्

स्पर्धात्मकः अयं महोत्सवः वलयस्तरे(Zone wise) समायोज्यते। प्रत्येकं परिसरात् आदर्शमहाविद्यालयात् वा एकः एव स्पर्धालुगणः वलयस्तरे भागं ग्रहीतुं शक्नोति। कः परिसरः आदर्शमहाविद्यालयो वा कस्मिन् वलये समायाति इति अन्तिमपृष्ठे दत्तं मानकचित्रं द्रष्टव्यम्।

## भागग्रणाय स्पर्धालुसंख्या

- प्रत्येकं परिसरस्य/आदर्शमहाविद्यालयस्य स्पर्धालुगणे आहत्य(सहायका अपि अन्तर्भवन्ति) 40 (मार्गदर्शकं विहाय) स्पर्धालवः भवितुम् अर्हन्ति।
- **शैक्षिक-चित्रकला-सांस्कृतिक-क्रीडास्पर्धासु** आहत्य एकः स्पर्धालुः अधिकाधिकं तिसृषु (3) स्पर्धासु एव भागग्रहणम् अर्हति।

## स्पर्धालुगणमार्गदर्शकाः

प्रत्येकं परिसरस्य/आदर्शमहाविद्यालयस्य स्पर्धालुगणस्य मार्गदर्शकरूपेण/संरक्षकरूपेण अध्यापकत्रयं (औचित्यानुसारेण द्वौ अध्यापकौ, एका अध्यापिका) वलयस्तरे आगन्तुमर्हति।

## वलयस्तरे भागग्रहणाय नामाङ्कनम्

वलयस्तरे भागग्रहणाय वलयस्तरस्पर्धायोजकसंस्थायां नामाङ्कनम् अवश्यं करणीयम्। स्वपरिसरात् /आदर्शमहाविद्यालयात् भागगृहीतृस्पर्धालूनां संपूर्णं स्पष्टविवरणम् अवश्यं दातव्यम्। निर्दिष्टस्पर्धालुसंख्यायाः अपेक्षया अधिकस्पर्धालूनां भागग्रणाय अनुमतिः वर्जिता अस्ति। विना नामङ्कनं समागतस्य गणस्य कृते स्पर्धायां भागग्रहणाय अनुमतिः न प्रदीयते।

## परिचयपत्रम्

स्पर्धालवः परिसरनिदेशकेन/आदर्शमहाविद्यालयस्य प्राचार्येण प्रदत्तं परिचयपत्रं अवश्यमानयेयुः। आयोजकैः याचितास्ते तदवश्यं प्रस्तुयुः।

## ध्वजः

- प्रत्येकं परिसरस्य/आदर्शमहाविद्यालयस्य स्पर्धालुगणः ध्वजमेकम् आनयेत्। गणप्रमुखत्वेन समागतः कश्चिदध्यापकः स्वपरिसरात्/आदर्शमहाविद्यालात् आनीतं ध्वजम् आयोजकपरिसराय प्रयच्छेत्।

## गणवेषः शोभायात्रा च

- स्पर्धालुगणस्य सर्वे सदस्याः ( मार्गदर्शकसहिताः ) स्व-स्व-परिसरस्य ( राज्यस्य ) संस्कृतिद्योतक - पारम्परिक - गणवेषं धृत्वा शोभायात्रायां भागं गृह्णीयुः।

Scanned with OKEN Scanner

# क्षेत्रीय-क्रीडा-सांस्कृतिक-शैक्षिक-स्पर्धायाः विशेषनियमाः

| | | |
|---|---|---|
| **(I). शैक्षिकस्पर्धाः** | | |
| 1. | **अनुवादस्पर्धा** (हिन्दीतः/ आङ्ग्लतः संस्कृतम्) | • प्रत्येकं परिसरात्/ आदर्शमहाविद्यालयात् एकः स्पर्धालुः भागग्रहणमर्हति ।<br>• एकपृष्ठात्मकः हिन्दीभाषया आङ्ग्लभाषया वा लिखितः कश्चन विषयः स्पर्धास्थले दीयते । तस्य सरलमानकसंस्कृतानुवादः (लिखितरूपेण) निर्दिष्टावधौ (एकघण्टावधौ) स्पर्धालुना करणीयः ।<br>• मूलाशयस्य यथावत्प्रकाशकः योग्यः सुन्दरः अनुवादः पुरस्कृतो भविष्यति। |
| 2. | **संस्कृतवार्तालेखनम्** | • प्रदत्तविषयमवलम्ब्य / प्रदर्शितकार्यक्रममवलम्ब्य पत्रिकायां प्रकाशनयोग्यरीत्या सरलमानकसंस्कृतेन वार्ता सज्जीकरणीया ।<br>• निर्धारिते काले (एकघण्टावधौ) वार्ता लिखितरूपेण प्रस्तोतव्या।<br>• विषयः एकघण्टातः प्राग् उद्घोषयिष्यते । |
| 3. | **सङ्गणकीयसंस्कृतम्** | • प्रत्येकं परिसरात् एकः स्पर्धालुः भागग्रहणमर्हति ।<br>• सर्वेभ्यः स्पर्धालुभ्यः सङ्गणके कार्यं कर्तुम् एकघण्टात्मकः (60 निमेषात्मकः) कालः दास्यते ।<br>• Unicode लिपिप्रभेदम् (font) उपयुज्य संस्कृते सञ्चिकानिर्माणम् (file making), प्रोग्रामिङ्ग्-करणम्, C भाषाप्रयोगः, Relation Database, अन्तर्जालस्य सदुपयोगः सङ्गोष्ठीप्रस्तुति (ppt)-निर्माणम् , Webinar-विषयकावबोधः, 'Word' उपयुज्य ग्रन्थप्रकाशनविषये सङ्गणकज्ञेन ज्ञातव्याः मूलभूतांशाः, उच्चारणानुकूल-चिह्नानाम् (Diacritical marks) उपयोगः, लिप्यन्तरणम् (Transliteration), पाठ्यांशस्य रूपान्तरणम् (Changing given format of text into required format) इत्यादिविषयेषु सैद्धान्तिकी / प्रायोगिकी परीक्षा भविष्यति । |
| **(II). चित्रकलास्पर्धाः** | | |
| 4. | **शैक्षिक-लघुचलच्चित्रनिर्माणम्** (Educational Short film Making) | • प्रत्येकं परिसरात् एकः स्पर्धालुः भागग्रहणमर्हति ।<br>• यः छात्रः चलच्चित्रस्य निर्देशनं करोति स एव स्पर्धालुः भवति।<br>• चलच्चित्रे अभिनेतारः परिसरच्छात्राः एव भवेयुः। चलच्चित्रे संभाषणादिकं सर्वं संस्कृते एव स्यात्। अश्लीलं संस्कृतिविरुद्धं देशस्य अवमाननात्मकं दृश्यं न स्यात् ।<br>• चलच्चित्रस्य निर्माणे परिसरच्छात्राणाम् एव सहयोगः स्यात्। क्वचित् Editing, Mixing, Music इत्यादीनां संयोजनं यथानुकूलं कर्तुं शक्नुवन्ति । औचित्यानुसारेण चलच्चित्रं प्रचारणीयविषयसम्बद्धं जनानां चित्ताकर्षकम्/ अभिरुचिवर्धकम् / कुतूहलोत्पादकं सरलमानकसंस्कृतभाषया प्रस्तोतव्यम् ।<br>• लघुचलच्चित्रस्य प्रस्तुतिसमयः अधिकाधिकम् 10 निमेषात्मको भवेत् ।<br>• चलच्चित्रस्य विषयः विश्वविद्यालयस्य जालपुटे पूर्वं संस्थाप्यते। दृश्यग्रहणं(Shooting) चलदूरवाण्या (Mobile) अपि कर्तुं शक्यते।<br>• स्पर्धानिमित्तं प्रतिपरिसरात्/आदर्शमहाविद्यालयात् चितस्य एकस्य चलच्चित्रस्य प्रस्तुतिः स्यात् ।<br>• चलच्चित्रं स्वयं कल्पितं स्यात्। चलच्चित्रस्य आरम्भे प्राचार्याणां सत्यापनं पत्रं स्यात्। |

Scanned with OKEN Scanner

| | | |
|---|---|---|
| 5. | रङ्गवल्ली | • प्रत्येकं परिसरात् एकः स्पर्धालुः भागग्रहणमर्हति।<br>• रङ्गवल्लीं निर्मातुं समग्रसामग्र्यः स्पर्धालुभिः स्वयमानेतव्याः।<br>• स्पर्धालुः रङ्गवल्ल्याः माध्यमस्य (सामग्रीणां) चयनं स्वेच्छया कर्तुं शक्ष्यति (वर्जितमाध्यमं/सामग्रीं विहाय)। (अतिदीर्घकालं यावत् शाश्वतरूपेण वा भूतले संश्लिष्टरूपेण स्थास्यमानाः ink/permanent ink/oil paint/chemical paint इत्यादिसामग्र्यः नानुमन्यन्ते)।<br>• आयोजकैः परिकल्पिते स्थाने (तदन्तर्गततया) रचनीयरङ्गवल्ल्याः आकारं स्वयं स्पर्धालुः निर्धारयितुमर्हति।<br>• रङ्गवल्ली वर्णनचित्रात्मिका, चित्रात्मिका, बिन्दु-बिन्दुयोजनात्मिका वा स्यात्।<br>• मुक्तचित्रणमपि भवितुमर्हति।<br>• रङ्गवल्लीं प्रस्तोतुं घण्टाद्वयात्मकः कालः कल्प्यते। |
| | **(III). सांस्कृतिकस्पर्धाः** | |
| 6. | एकक-संस्कृतगीतम् | • प्रत्येकं परिसरात् एकः स्पर्धालुः भागग्रहणमर्हति।<br>• गानाय पञ्च (5) निमेषात्मकः कालः दास्यते।<br>• संस्कृतभाषानिबद्धं गीतभजनादिकं चलचित्रगीतानि विहाय गेयम्।<br>• स्वर / रागताललयसमन्वयस्य, समग्रप्रभावस्य च आधारेण निर्णयः भविष्यति।<br>• प्रस्तोतव्यगीतस्य प्रतिकृतिचतुष्टयं टङ्किताक्षरैः युवमहोत्सवस्य पञ्जीकरणावसरे समर्पणीयम्।<br>• गायकेन सह द्वौ वादकौ भवितुमर्हतः (वादकयोः अनिवार्यता नास्ति)। अवधेयं यत् परिसरे अनधीयानाः बाह्या वादकरूपेण नानुमन्यन्ते।<br>• अत्र गानं मुख्यम्, अतः वाद्ययन्त्रध्वनिना गायकस्य कण्ठरवः/ कौशलविशेषः / उच्चारणम् आच्छादितं यथा न स्यात् तथा वाद्ययन्त्राणाम् उपयोगविषये अवधानं स्यात्। |
| 7. | समूहगानम् | • प्रत्येकं परिसरात् एकः गणः भागग्रहणमर्हति। गणे अधिकाधिकं पञ्च (5) स्पर्धालवः भवितुमर्हन्ति।<br>• गानाय पञ्च (5) निमेषात्मकः कालः दास्यते।<br>• संस्कृतभाषानिबद्धं गीतमेव गेयम्।<br>• गीतं तावत् देशभक्तिगीतम्/संस्कृतभक्तिगीतम्/संस्कृतप्रचारगीतम्/ लोकगीतम्/स्थानीय-संस्कृति-प्रतिबिम्बकम्-इत्येवं प्रकारकेषु अन्यतमप्रकारकं भवितुमर्हति।<br>• स्वरताललयसमन्वयस्य, समग्रप्रभावस्य च आधारेण निर्णयः भविष्यति।<br>• प्रस्तोतव्यगीतस्य प्रतिकृतिचतुष्टयं स्पष्टाक्षरैः टङ्किकितरूपेण युवमहोत्सवस्य पञ्जीकरणावसरे समर्पणीयम्।<br>• गायकेन सह द्वौ वादकौ भवितुमर्हतः (वादकयोः अनिवार्यता नास्ति)। अवधेयं यत् परिसरे अनधीयानाः बाह्या वादकरूपेण नानुमन्यन्ते।<br>• अत्र गानं मुख्यम्, अतःवाद्ययन्त्रध्वनिना गायकस्य कण्ठरवः/ कौशलविशेषः/उच्चारः आच्छादितः यथा न स्यात् तथा वाद्ययन्त्राणाम् उपयोगविषये अवधानं स्यात्। |
| 8. | सङ्घनृत्यम् | • प्रत्येकं परिसरात् एकः गणः भागग्रहणमर्हति। गणे अधिकाधिकं षट् (6) स्पर्धालवः भवितुमर्हन्ति। सोऽयं गणः परिसरात् निश्चिते गणे एव अन्तर्भूतः स्यात्।<br>• भारतीयसंस्कृत्यनुसारि / भारतीयसंस्कृतिप्रतिबिम्बिकं नृत्यमेव अनुमन्यते। नृत्यं शास्त्रीयम् |

/ उपशास्त्रीयं (semi classic), स्तोत्रसाहित्यावलम्बि/लोकनृत्यं/जानपदनृत्यं (folk dance) इत्येवं प्रकारकेषु अन्यतमप्रकारकं भवितुमर्हति ।

- पाश्चात्यशैल्या: 'disco dance- शैलीकनृत्यं ' नानुमन्यते ।
- नृत्यगीतं संस्कृतेन एव भवेत् ।
- नृत्यगीतस्य प्रतिकृतिचतुष्टयं स्पष्टाक्षरैः टङ्कितरूपेण युवमहोत्सवस्य पञ्जीकरणावसरे समर्पणीयम् ।
- ताल-लय-भाव-मुद्रा-वेषभूषा-अभिनय-पदविन्यासादिकं समग्रप्रभावं च आधारीकृत्य निर्णयः भविष्यति ।
- नृत्यस्य प्रस्तुतये दश(10) निमेषात्मकः कालः दास्यते ।
- नृत्यप्रस्तुतिकाले यदि वाद्ययन्त्राणि उपयोक्तव्यानि तर्हि भारतीयवाद्ययन्त्राणि एव उपयोक्तव्यानि ।

## I ( IV ). शारीरिक/क्रीडा-

**9. योगासनम्**
(बालकानाम्)

**10.योगासनम्**
(बालिकानाम्)

- **प्रत्येकं परिसरात्/आदर्शमहाविद्यालयात् द्वौ (एकः बालकः एका बालिका च) भागं स्वीकर्तुमर्हतः ।**
- **निर्णायकाः अधोनिर्दिष्टेषु आसनेषु यद्यदासनं प्रदर्शयितुं वदन्ति तत्तदासनं प्रत्येकं स्पर्धिना प्रदर्शनीयम् ।**
- **अत्र स्पर्धायाः घट्टद्वयमस्ति –**

**1. अनिवार्यासनप्रदर्शनम्, 2. विशेषासनप्रदर्शनं चेति ।**

**तत्र प्रथमे घट्टे स्पर्धालुभिः अधोनिर्दिष्टानि अनिवार्यासनानि प्रदर्शनीयानि –**

1. ताडासनम्
2. पश्चिमोत्तानासनम्
3. सर्वाङ्गासनम्
4. पूर्णधनुरासनम्
5. कर्णपीडासनम्

**द्वितीये घट्टे अधोनिर्दिष्टेषु आसनेषु किमपि आसनद्वयं निर्णायकानां सूचनानुसारेण प्रदर्शनीयम्-**

| **बालकानां कृते** | **बालिकानां कृते** |
|---|---|
| पूर्णचक्रासनम् | पूर्णभुजङ्गासनम् |
| सेतुबन्धसर्वाङ्गासनम् | पूर्णमत्स्यासनम् |
| वृश्चिकासनम् | अर्धबन्धपद्मासनम् |
| पूर्णशलभासनम् | नटराजासनम् |

- घट्टद्वये अपि बालकानां बालिकानां च स्पर्धा पृथक् पृथगेव भविष्यति ।
- निर्णायकैः निर्धारितक्षणानि (अवधिं) यावत् स्पर्धालुभिः आसनसिद्धिः प्रदर्शनीया।

Scanned with OKEN Scanner

| | | |
|---|---|---|
| 11.<br>12.<br>13.<br>14.<br>15.<br>16. | 100 मीटरधावनम्<br>( **बालकानाम्** )<br>200 मीटरधावनम्<br>( **बालकानाम्** )<br>400 मीटरधावनम्<br>( **बालकानाम्** )<br>100 मीटरधावनम्<br>(**बालिकानाम्**)<br>200 मीटरधावनम्<br>(**बालिकानाम्**)<br>400 मीटरधावनम्<br>(**बालिकानाम्**)<br>800 मीटरधावनम्<br>( **बालकानाम्** )<br>1500 मीटरधावनम्<br>( **बालकानाम्** ) | **अवधेयम्** – धावनस्पर्धासु प्रत्येकं स्पर्धायाः निमित्तं, प्रत्येकं परिसरस्य/ आदर्शमहाविद्यालयस्य कृते आहत्य अनुमत-स्पर्धालुसङ्ख्यान्तर्गतः एकैकः/ एकैका स्पर्धालुः (one entry for each competition from each Campus/Adarsh Mahavidyalaya within the limit of total No. allowed for each team ) भागं ग्रहीतुमर्हति । |
| 17.<br>18. | **बैड्मिण्टन् एककम्**<br>( बालकानाम् )<br>**बैड्मिण्टन् युगलम्**<br>( बालकानाम् ) | प्रत्येकं स्पर्धायाः निमित्तं, प्रत्येकं परिसरस्य/ आदर्शमहाविद्यालयस्य कृते आहत्य अनुमत-स्पर्धालुसङ्ख्यान्तर्गतः एकैकः/ एकैका स्पर्धालुः (one entry for each competition from each Campus/Adarsh Mahavidyalaya within the limit of total No. allowed for each team ) भागं ग्रहीतुमर्हति । |
| 19.<br>20. | **बैड्मिण्टन् एककम्**<br>( बालिकानाम् )<br>**बैड्मिण्टन् युगलम्**<br>( बालिकानाम् ) | प्रत्येकं स्पर्धायाः निमित्तं, प्रत्येकं परिसरस्य/ आदर्शमहाविद्यालयस्य कृते आहत्य अनुमत-स्पर्धालुसङ्ख्यान्तर्गतं स्पर्धालुद्वयं (Two entry for each competition from each Campus/Adarsh Mahavidyalaya within the limit of total No. allowed for each team ) भागं ग्रहीतुमर्हति । |
| 21. | **हस्तकन्दुकस्पर्धा**<br>Volley Ball<br>(केवलं बालकानाम्) | • प्रत्येकं परिसरस्य/ आदर्शमहाविद्यालयस्य कृते आहत्य निर्धारित-स्पर्धालुसङ्ख्यान्तर्गतानां बालकानाम् एकः गणः भागग्रहणमर्हति ।<br>• गणे सप्त (6 + 1) क्रीडकाः भवितुमर्हन्ति । |
| 22. | **कबड्डी**<br>Kabaddi<br>(केवलं बालकानाम्) | • प्रत्येकं परिसरस्य/ आदर्शमहाविद्यालयस्य कृते आहत्य निर्धारित-स्पर्धालुसङ्ख्यान्तर्गतानां बालकानाम् एकः गणः भागग्रहणमर्हति।<br>• गणे अष्टौ (7+1) क्रीडकाः भवितुमर्हन्ति ।<br>• 80 किलोग्रामतः अधिकभारवताम् अत्र प्रवेशो नास्ति । |
| 23. | **खो-खो**<br>Kho-Kho<br>( केवलं बालिकानाम् ) | • प्रत्येकं परिसरस्य कृते आहत्य निर्धारितस्पर्धालुसङ्ख्यान्तर्गतानां बालिकानाम् एकः गणः भागग्रहणमर्हति।<br>• गणे दश ( 9+1) बालिकाः भवितुमर्हन्ति । |
| 24. | **चतुरङ्गम्** Chess | प्रत्येकं परिसरस्य/ आदर्शमहाविद्यालयस्य एकः बालकः बालिका वा भागग्रहणमर्हति । |
| 25. | **उच्चकूर्दनम्** (High Jump)<br>( बालकानाम् )<br>**उच्चकूर्दनम्**<br>( बालिकानाम् ) | प्रत्येकं स्पर्धायाः निमित्तं, प्रत्येकं परिसरस्य/ आदर्शमहाविद्यालयस्य कृते आहत्य अनुमत-स्पर्धालुसङ्ख्यान्तर्गतः एकैकः/ एकैका स्पर्धालुः (one entry for each competition from each Campus/Adarsh Mahavidyalaya within the limit of total No. allowed for each team ) भागं ग्रहीतुमर्हति । |

Scanned with OKEN Scanner

| | | |
|---|---|---|
| 26 | **दूरकूर्दनम् (Long Jump)**<br>( बालकानाम् )<br>**दूरकूर्दनम् (Long Jump)**<br>( बालिकानाम्) | प्रत्येकं स्पर्धायाः निमित्तं, प्रत्येकं परिसरस्य/ आदर्शमहाविद्यालयस्य कृते आहत्य अनुमत-स्पर्धालुसङ्ख्यान्तर्गतः एकैकः/ एकैका स्पर्धालुः (one entry for each competition from each Campus/Adarsh Mahavidyalaya within the limit of total No. allowed for each team ) भागं ग्रहीतुमर्हति। |
| 27. | **चक्रक्षेपणम्(Discus Throw)**<br>( बालकानाम् )<br>**चक्रक्षेपणम्(Discus Throw)**<br>( बालिकानाम्) | प्रत्येकं स्पर्धायाः निमित्तं, प्रत्येकं परिसरस्य/ आदर्शमहाविद्यालयस्य कृते आहत्य अनुमत-स्पर्धालुसङ्ख्यान्तर्गतः एकैकः/ एकैका स्पर्धालुः (one entry for each competition from each Campus/Adarsh Mahavidyalaya within the limit of total No. allowed for each team ) भागं ग्रहीतुमर्हति। |
| 28. | **कन्दुकक्षेपणम्( Shot Put)**<br>( बालकानाम् )<br>**कन्दुकक्षेपणम्( Shot Put)**<br>( बालिकानाम्) | प्रत्येकं स्पर्धायाः निमित्तं, प्रत्येकं परिसरस्य/ आदर्शमहाविद्यालयस्य कृते आहत्य अनुमत-स्पर्धालुसङ्ख्यान्तर्गतः एकैकः/ एकैका स्पर्धालुः (one entry for each competition from each Campus/Adarsh Mahavidyalaya within the limit of total No. allowed for each team ) भागं ग्रहीतुमर्हति। |
| 29. | **मल्लयुद्धम्** Wrestling / **मल्लस्थम्भः**<br>अस्यां स्पर्धायां स्पर्धालूनां भारानुसारेण चत्वारः वर्गाः कल्पिताः। | |
| I | प्रथमः वर्गः 57 किलोग्रामपर्यन्तम् | |
| II | द्वितीयः वर्गः 61 किलोग्रामपर्यन्तम् | |
| III | तृतीयः वर्गः 65 किलोग्रामपर्यन्तम् | |
| IV | चतुर्थः वर्गः 70 किलोग्रामपर्यन्तम् | |
| V | पञ्चमः वर्गः 74 किलोग्रामपर्यन्तम् | |

## केचन अवधेयांशाः

- महोत्सवस्य उद्घाटनसत्रे सम्पूर्तिसत्रे च सर्वेषाम्( स्पर्धालूनां गणमार्गदर्शकानां च ) उपस्थितिः अनिवार्या। समयस्य पालनं सर्वैः अवश्यं करणीयम्।
- सर्वेऽपि स्पर्धालवः स्फूर्तियुतेन भागग्रहणेन महोत्सवस्य उद्देश्यानि सफलयितुं प्रयतेरन्।
- स्पर्धालुभिः प्रतिस्पर्धिपरिसरसदस्यैः सह, स्वगणसदस्यैः सह, प्रेक्षकसदस्यैः सह, आयोजकपरिसरसदस्यैश्च सह सौमनस्येन व्यवहृत्य सौहार्दयुतं वातावरणं रक्षणीयम्।
- महोत्सवे सांस्कृतिकपरिवेषः / पारम्परिकमूल्यांशः न दूषणीयः।
- **केन्द्रीयसंस्कृतविश्वविद्यालयस्य अनन्यसाधारणं वैशिष्ट्यमस्ति संस्कृतव्यवहारः। एतत् संरक्षणीयम्। वैशिष्ट्यमिदं साक्षात्कर्तुम् उत्सुको भवति समाजः, वार्ताहरमण्डलं च। स्पर्धालुभिः परस्परं संस्कृतभाषया व्यवहृत्य संस्कृतयुवशक्तिः निरूपणीया।**
- आयोजकैः स्पर्धायोजनभोजनावासादिविषयेषु सुव्यवस्थायै यथाशक्ति प्रयत्येत। तथापि अकस्मात् अनवधानेन वा यदि काचित् समस्या जायेत तर्हि सामञ्जस्येन समस्यां परिहर्तुं सर्वैः साहाय्यमाचरणीयम्।
- स्वं / स्वस्य गणं विजयिनं कर्तुं सर्वोऽपि स्पर्धालुः स्पर्धानियमानुसारेण ( ऋजुमार्गेण ) एव पूर्णतः प्रयत्नं कुर्यात्। स्वपरिसरस्य दलं विजयि कर्तुं सर्वोपि स्पर्धालुः स्वसामर्थ्यानुसारेण न्याय्यमाचरेत्।
- सर्वे स्पर्धालवः निर्णायकैः कृतं स्पर्धानिर्णयं सहर्षम् अङ्गीकुर्युः। जयपराजयौ स्पर्धायाः अनिवार्यपरिणतिरिति मत्वा जयपराजयविषये स्पर्धालुभिः / गणमार्गदर्शकैः वा उद्विग्नैः न भाव्यम्।

Scanned with OKEN Scanner

- स्पर्धापरिणामं ज्ञात्वा पराजिताः आत्मग्लानिम् न अनुभवेयुः, प्रत्युत पराजयोऽपि सोपानम् इति स्मृत्वा भागग्रहणमभिलक्ष्य धन्यतामनुभवेयुः, पूर्णमनसा विजयिनाम् अभिनन्दनं च कुर्युः ।
- विजयिनः उत्साहिनः विनयान्विताश्च सन्तः पुरस्कारं गृह्णीयुः । विजयिनः पराजितानां विषये तिरस्कारबुद्धिं हीनभावनां वा न धारयेयुः, प्रत्युत 'अन्येषां भागग्रहणकारणादेव वयं विजयिनः अभवाम' इति धारणया अन्यान् प्रति कृतज्ञताभावं मनसि कुर्युः ।
- स्पर्धानियमपालनविषयिणी कापि आपत्तिः / अस्पष्टता यदि जायते तर्हि स्पर्धालुभिः उद्वेगेन कोलाहलः न कार्यः । स्पर्धालवः अनिवार्यपरिस्थितौ स्वगणमार्गदर्शकमाध्यमेन एव समस्यां निवेदयितुमर्हन्ति । तद्विषये अधिकृतनिर्णायकमण्डलेन प्रदत्तः निर्णयः अन्तिमः सर्वमान्यश्च भविष्यति ।
- स्पर्धायां स्वगणस्य भागग्रहणानन्तरं स्पर्धालुभिः इतस्ततः वृथा न अटनीयम् । अन्येषामपि प्रस्तुतयः अवलोकनीयाः ।
- आयोजकपक्षतः निश्चितम् आवासस्थानं विहाय स्पर्धालुगणसदस्यैः (अनुमतिं विना) अन्यत्र स्वयम् आवासः न कल्पनीयः ।
- स्पर्धालुगणसदस्याः(मार्गदर्शका अपि) स्पर्धायोजनदिनेषु आयोजनपरिसरम्/ आवासस्थानं परित्यज्य अन्यत्र न अटेयुः ।
- स्पर्धालवः परस्परं भ्रातृ-भगिनी-रूपेण संयमितव्यवहारं कुर्युः ।
- स्पर्धालवः युवमहोत्सवं प्रति आगमनयात्राकाले युवमहोत्सवकाले, प्रतिगमनयात्रायामपि, स्वेषां, स्वपरिसरस्य, केन्द्रीयसंस्कृतविश्वविद्यालयस्य च प्रतिष्ठाविघातकम् आचरणं न कुर्युः ।
- नियमोल्लङ्घनकर्तारः अभद्राचरणशीलाः, निषिद्धाचरणकर्तारः च अधिकारिणां निर्णयानुसारेण स्पर्धातः बहिष्कृताः दण्डिता वा भवितुमर्हन्ति । निर्णायकानां निर्णयः एव अन्तिमः भवति।

Scanned with OKEN Scanner

## संभाविता: तिथय:

### प्रथमवलयम्
संभावितदिनाङ्कः अक्तोबर/नबम्बर, 2024
स्थानम् – गुरुवायूरपरिसरः, त्रिशूरः

### द्वितीयवलयम्
संभावितदिनाङ्कः अक्तोबर/नबम्बर, 2024
स्थानम् – श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

### तृतीयवलयम्
संभावितदिनाङ्कः अक्तोबर/नबम्बर, 2024
स्थानम् – भोपालपरिसरः, भोपालः

### चतुर्थवलयम्
संभावितदिनाङ्कः अक्तोबर/नबम्बर, 2024
स्थानम् – श्रीसदाशिवपरिसरः, पुरी

वलयस्तरमहोत्सवायोजनदिनाङ्काः तत्तद्वलयस्तरीयमहोत्सावायोजकैः निर्णेष्यन्ते। अतः तद्विषये अधिकं विवरणं वलयस्तरीयमहोत्सवायोजकानां सकाशात् प्राप्तव्यम्।

### संपर्कसूत्रम्
**प्रो. मदनमोहन झा**
**अधिष्ठाता, छात्रकल्याणविभागः**
**दूरवाणीसंख्या – 9004904059**
**ईमेल- सङ्केतः -deansw@csu.co.in**

Scanned with OKEN Scanner

## वलयमानकचित्रम्

1. श्रीरणवीरपरिसरः, जम्मू
2. वेदव्यासपरिसरः, हि.प्र.
3. **रघुनाथकीर्तिपरिसरः,देवप्रयागः**
4. गङ्गानाथझापरिसरः, प्रयागराजः
5. श्रीभगवानदास- आदर्शसंस्कृतमहाविद्यालयः
6. एस.डी आदर्शमहाविद्यालयः, हि.प्र
7. हिमाचलआदर्शसंस्कृतमहाविद्यालयः,हि.प्र
8. रानीपद्मावतीतारायोगतन्त्र- आदर्शसंस्कृतमहाविद्यालयः, उ.प्र.
9. श्रीदिवानकृष्णकिशोरआदर्शमहाविद्यालयः हरियाणा

द्वितीयवलयम्

1. जयपुरपरिसरः, राजस्थानम्
2. **भोपालपरिसरः, म.प्र.**
3. लखनऊपरिसरः, उ.प्र.
4. हरियाणासंस्कृतविद्यापीठम्, हरियाणा
5. श्रीरङ्गलक्ष्मीसंस्कृतादर्शसंस्कृत महाविद्यालयः वृन्दावनम्
6. श्रीमतीलाडदेवीशर्मापञ्चोली- आदर्शसंस्कृतमहाविद्यालयः, राजस्थानम्
7. श्री एकरसानंद-आदर्श संस्कृतमहाविद्यालयः, उ.प्र

तृतीयवलयम्

**युवमहोत्सवः**

चतुर्थवलयम्

1. **श्रीसदाशिवपरिसरः, पुरी**
2. एकलव्यपरिसरः. अगरतला
3. लक्ष्मीदेवीश्रॉफआदर्श - संस्कृतमहाविद्यालयः, झारखण्डः
4. राजकुमारीगणेशशर्मा- संस्कृतविद्यापीठम्, दरभङ्गा, बिहारः
5. श्रीस्वामीपारंगकुशाचार्य - आदर्शसंस्कृतमहाविद्यालयः,
6. श्रीसीतारामवैदिकआदर्श - संस्कृतमहाविद्यालयः, प.व.
7. कालियाचकबिक्रमकिशोर - आदर्शसंस्कृतमहाविद्यालयः
8. डॉ.रामजीमेहताआदर्शसंस्कृत- महाविद्यालयः,बिहारः
9. जगदीशनारायण- ब्रह्मचारी- आश्रमआदर्शसंस्कृत- महाविद्यालयः, दरभङ्गा
10. श्रीरामसुन्दरसंस्कृतविश्व विद्याप्रतिष्ठानम्, बिहारः
11. श्रीराधामाधवआदर्शसंस्कृत- महाविद्यालयः, मणिपुरम्

प्रथमवलयम्

1. **गुरुवायूरपरिसरः,केरलम्**
2. श्रीराजीवगान्धीपरिसरः, कर्णाटकम्
3. क.जे.सोमैयापरिसरः, मुम्बई
4. मुम्बादेवीआदर्शसंस्कृतमहाविद्यालयः, मुम्बई
5. कालिकटआदर्शसंस्कृतविद्यापीठम्,केरलम्
6. मद्राससंस्कृतमहाविद्यालयः, चेन्नै
7. श्रीअहोबिलमठआदर्शसंस्कृतमहाविद्यालयः, तमिलनाडु

Scanned with OKEN Scanner

(केन्)द्रीय संस्कृत विश्वविद्यालय
(सं)सद के अधिनियम द्वारा स्थापित
(पूर्व) में राष्ट्रिय संस्कृत संस्थान, मानित विश्वविद्यालय)
(शिक्षा) मन्त्रालय, भारत सरकार के अधीन
56-57, सांस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली - 110058

Central Sanskrit University
Established by an Act of Parliament
(Formerly Rashtriya Sanskrit Sansthan, Deemed to be University
Under Ministry of Education, Govt. of India
56-57, Institutional Area, Janakpuri, New Delhi - 110058

फा.सं. 8–1 / के.सं.वि. / छात्र कल्याण / 2023–24 / 183

दिनांक: 20–09–2024

सेवा में,

श्रीमान् निदेशक / प्राचार्य महोदय,
समस्त प्रतिभागी परिसर / सम्बद्ध महाविद्यालय (युवा महोत्सव–2024),
केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली।

**विषयः संस्कृत व्लॉग प्रतियोगिता को क्रीड़ा–सांस्कृतिक–शैक्षिक स्पर्धा (युवा महोत्सव) में शामिल किये जाने के संबंध में।**

महोदय / महोदया,

उपरोक्त विषय के सन्दर्भ में सूचनीय है कि माननीय कुलपति महोदय के द्वारा संस्कृति एवं संस्कृत के व्यापक प्रचार–प्रसार तथा विद्यार्थियों को व्लॉगिंग के क्षेत्र में स्वरोजगार के अवसर उपलब्ध कराने के उद्देश्य से संस्कृत व्लॉग प्रतियोगिता को क्रीड़ा–सांस्कृतिक–शैक्षिक स्पर्धा (युवा महोत्सव) 2024–25 में शामिल किया गया है।

अतः आपसे अनुरोध है कि उपरोक्त प्रतियोगिता के सम्बन्ध में व्यापक प्रचार–प्रसार कर, विद्यार्थियों को इस प्रतियोगिता में भाग ग्रहण करने के लिए प्रोत्साहित करे। इस स्पर्धा में प्रति परिसर / सम्बद्ध महाविद्यालय से केवल एक प्रतिभागी भाग ग्रहण कर सकेगा जो युवा महोत्सव हेतु स्वीकृत कुल प्रतिभागी संख्या के अन्तर्गत ही होगा।

यह पत्र सक्षम अधिकारी की अनुमति से निर्गत किया गया है।

सधन्यवाद।

[प्रो. मदन मोहन झा]
अधिष्ठाता (छात्र कल्याण)

संलग्नकः नियमावली।

**प्रतिलिपि सूचनार्थ निम्नांकित को प्रेषित हैः**

1. कुलपति कार्यालय, केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली।
2. कुलसचिव कार्यालय, केन्द्रीय संस्कृत विश्वविद्यालय, दिल्ली।
3. **निदेशक, आयोजक परिसर (युवा महोत्सव–2024), के.सं.वि., दिल्ली, से अनुरोध है कि उपरोक्त प्रतियोगिता के सफल आयोजन हेतु समस्त आवश्यक व्यवस्थाऐं करें।**
4. संचित पंजिका।



Scanned with OKEN Scanner

फा.सं. 8-1/के.सं.वि./छात्र कल्याण/2023-24/182

# केंद्रीय संस्कृत विश्वविद्यालय

# CENTRAL SANSKRIT UNIVERSITY

नई दिल्ली/New Delhi – 110058

दिनांक: 20.09.2024

## संं-व्लॉग प्रतियोगिता हेतु नियमावली

युवा महोत्सव-2024 के अंतर्गत आयोजित की जाने वाली सं-व्लॉग प्रतियोगिता हेतु नियमावली अधोलिखित है:-

1) **कक्षा**: प्राक शास्त्री से विद्यावारिधि में अध्ययनरत विद्यार्थी इस प्रतियोगिता में भाग ग्रहण कर सकते है।
2) **समय**: सं-व्लॉग केवल 3 से 5 मिनट तक का होना चाहिए।
3) **भाषा**: सं-व्लॉग केवल संस्कृत भाषा में चाहिए।
4) **संविधान का पालन**: सं-व्लॉग हेतु भारतीय संविधान का परिपालन अनिवार्य है।
5) **भावनाओं का सम्मान**: सं-व्लॉग किसी भी व्यक्ति, जाति, धर्म, सम्प्रदाय, या देश की भावनाओं को आहत करने वाला नहीं होना चाहिए।
6) **विषय**: सं-व्लॉग का विषय, केंद्रीय संस्कृत विश्वविद्यालय को केंद्र में रखकर संस्कृत भाषा, भारतीय संस्कृति एवं भारतीय ज्ञान परंपरा को ध्यान में रखते हुए, अखिल भारतीय शैक्षणिक एवं सांस्कृतिक स्पर्धा को प्रदर्शित करने वाला होना चाहिए। सं-व्लॉग विषय में पूर्वाभ्यास, यात्रा वृत्तान्त, शोभा-यात्रा, उद्घाटन, भारतीय शैक्षणिक एवं सांस्कृतिक स्पर्धायें, आयोजन स्थल के सांस्कृतिक महत्त्व इत्यादि को शामिल किया जा सकता है।

धन्यवाद!

[प्रो. मदन मोहन झा]
अधिष्ठाता (छात्र कल्याण)

Scanned with OKEN Scanner